# Devakikritam Vishnu Stotram

# देवकीकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Devakikritam Vishnu Stotram 2

File name : viShNustotraMdevakIkRRitaM2.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 90

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# देवकीकृतं विष्णुस्तोत्रम्

अबालो बालरूपेण येनेश त्वमिहास्थितः ।
त्वद्रूपं प्रणिपत्याहं यद्ब्रवीमि निबोध तत् ॥ १८॥

नमस्ते सर्वभूतेश नमस्ते मधुसूदन ।
नमस्ते पुण्डरीकाक्ष नमस्तेऽस्तु जनार्दन ॥ १९॥

नमस्ते शार्ङ्गचक्रासिगदापरिघपाणये ।
उपेन्द्रायाप्रमेयाय हृषीकेशाय वै नमः ॥ २०॥

नमोऽस्तु तेऽणुरूपाय बृहद्रूपाय वै नमः ।
अशेषभूतरूपाय तथारूपाय ते नमः ॥ २१॥

अनिर्देश्यविशेषाय तुभ्यं सर्वात्मने नमः ।
सर्वेश्वराय सर्वाय सर्वभूताय ते नमः ॥ २२॥

नमोऽस्तु ते वासुदेव नमोऽस्तु कमलेक्षण
अशेषभूतरूपाय तथाभूताय ते नमः
नमोऽस्तु तेऽश्वरूपाय तथारूपाय ते नमः
अनिर्देश्यविशेषाय तुभ्यं सर्वात्मने नमः
नमोऽस्तु ते वासुदेव नमस्ते पुष्करेक्षण ।
नमोऽस्तु ते सदाचिन्त्य योगिचिन्त्य जगत्पते ॥ २३॥

विष्णो नमोऽस्तु ते कृष्ण नमस्ते पुरुषोत्तम ।
नमो नारायण हरे नमस्तेऽस्तु सदाच्युत ॥ २४॥

नमो नमस्ते गोविन्द नमस्ते गरुडध्वज ।
श्रीश श्रीवत्स योगीश श्रीकान्तेश नमोऽस्तु ते ॥ २५॥

नीलोत्पलदलश्याम दंष्ट्रोद्धृतवसुन्धर ।
हिरण्याक्षरिपो देव नमस्ते यज्ञसूकर ॥ २६॥

नृसिंह जय विश्वात्मन्दैत्योरःस्थलदारक ।
नमो नमस्तेऽस्तु सदा विक्षेपध्वस्ततारक ॥ २७॥

मायावामनरूपाय तुभ्यं देव नमो नमः ।
त्रिविक्रम नमस्तुभ्यं त्रैलोक्यक्रान्तिदुर्जय ॥ २८॥

ऋग्यजुःसामभूताय वेदाहरणकर्मणे ।
प्रणवोद्गीतवचसे महाश्वशिरसे नमः ॥ २९॥

निःक्षत्रियोर्वीकरण विकरालपराक्रम ।
जामदग्न्य नमस्तुभ्यं कार्तवीर्यासुतस्कर ॥ ३०॥

पौलस्त्यकुलनाशाय साहुमार्गविचारिणे ।
नलसेतुकृते तुभ्यं नमो राघवरूपिणे ॥ ३१॥

साम्प्रतं मत्प्रसन्नाय सम्भूताय ममोदरे ।
स्वमायाबालरूपाय नमः कृष्णाय वै हरे ॥ ३२॥

यावन्ति तव रूपाणि यावत्यश्च विभूतयः ।
नमामि कृष्ण सर्वेभ्यस्तेभ्यस्ताभ्यश्च सर्वदा ॥ ३३॥

स्वरूपचेष्टितं यत्ते यद्देवत्वे विचेष्टितम् ।
यच्च तिर्यङ्मनुष्यत्वे चेष्टितं तन्नमाम्यहम् ॥ ३४॥

परमेश परेशेश तिर्यगीश नरेश्वर ।
सर्वेश्वरेश्वरेशेश नमस्ते पुरुषोत्तम ॥ ३५॥

इति विष्णुधर्मेषु नवतितमोऽध्यायान्तर्गतं देवकीकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Devakikritam Vishnu Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*